संस्कृत

ग्रं.नं.८२

नाटक

# देवीमहोत्सव

५७८/श्लो. ८६

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1) श्रीगणेशायनमः॥ मार्कंडेयपुराणस्थदेवलाध्यायच
तुष्टयं॥ चंडीसमर्पयाक्रमस्तु कल्पवल्लीनदाश्रयां॥
मेत्रकल्पलतांडामरादितंत्रानुसारिणं॥ महोदधिमंत्र
पूर्वंतंत्रसारनिबंधनं॥ देवीमहोत्सवाद्याश्चपस्थली:
पालकल्पका॥ विभाव्योमानंदनाथोवक्तिचंडयायजिक्र
मं॥ अथेस्यादि॰ चंडीपाठांगत्वेन भूमशुद्धिभूतशुद्धिप्रा
णप्रतिष्ठांतमातृकाबहिर्मातृकान्यासांश्चकरिष्ये॥
आदौ भूशुद्धि: पृथ्वीत्वयाधृतालोका॰ भूमिंप्रार्थ्य॥
चित्रकंबलाद्यासनमास्तीर्य॥ तत्र आत्मासनाय॰ यो
गास॰ सुखास॰ इस्यासन देवता: संपूज्य॥ तत्रपद्मा
सनाद्यन्यतमेनोपविश्य॥ मूलेनशिखां बध्वावामेगु
रुभ्यो॰ दक्षिणेगणपतये॰ इतिनत्वा॥ अपसर्पंतुते

(2) यांत्राभिमंत्रितजलप्रक्षेपणा नारिक्षिचरानपसार्यो

भूता ये भूता भूमि संस्थिता: ये भूता विघ्नकर्तारस्ते नश्यंतु शि
वाज्ञया ॥ इति मंत्रमुच्चार्य ॥ वामपादपार्ष्णिना त्रिभूमिमाहृ
त्य भौमान् भूतानपसार्योर्ध्वं वीक्ष्य दिक्षु दिव्य दृष्ट्यवलोकने
न च दिव्यानपसार्य निर्गच्छंताभूतानां वामांग संकोचेन मार्गं द
त्वा नाराचमुद्रया शिवं भनं त्रिशूलमुद्रया ग्निप्राकारं च कृत्वा
परितो रक्षां विदध्यात् ॥ इति भूतशुद्धिः ॥ भूलशुद्धिः ॥ ॐ ह्रीं
हंसः सोहं इति मंत्रेण मूलाधारस्थितां कुंडलीं शक्तिं स्वजीव
सहितां सुषुम्नानाडी मार्गेण सहस्रारपद्मस्थे परशिवे संयो
ज्य ॥ ॐ लंफट् पादादिजानुपर्यंतं पृथ्वीं जले प्रविलापयामि
ॐ वंफट् जान्वादिनाभिपर्यंतं जलं तेजसि प्रविलापयामि ॥ ॐ भूल०
रंफट् नाभ्यादिकंठपर्यंतं तेजः वायौ प्रविलापयामि ॥ ॐ यंफ
ट् कंठादिभ्रूमध्यपर्यंतं वायुमाकाशे प्रविलापयामि ॥ ॐ हं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

फट् भ्रूमध्यादिब्रह्मरंध्रपर्यंतं आकाशमहंकारे प्रविलापया
मि॥ अहंकारं महत्तत्वे प्रविलापयामि॥ महत्तत्वं प्रकृतौ प्रवि॰
प्रकृतिं श्रीमहालक्ष्म्याभिधे परब्रह्मणि प्र॰ इति प्रविलाप्य॥
वासनामयं पापपुरुषं कलुषं भीममधोमुखं वामकुक्षौ विचिं
त्य॥ यमिति वायुबीजं षोडशवारमावर्त्तयन् श्वासवायुमी
डयापूरयित्वा तेन तं निजदेहसहितं शोषितं भावयित्वा रामित्य
ग्निबीजं चतुःषष्टिवारमावर्त्तयन् सुषुम्णायां कुंभयित्वा ते
न तं स्वदेहं च दग्धं विचिंत्य॥ पुनर्यमिति वायुबीजं द्वात्रिंश
द्वारमावर्त्तयन्॥ पिंगलया रेचयित्वा॥ तेन पापपुरुषभ
स्म बहिर्निर्गतं विभाव्य॥ वमित्यमृतबीजं मस्तके स्मृत्वा॥
ततः स्रवंतीममृतधारां संजीविनीं विचिंत्य॥ लं पृथ्वीबीजं
मूलाधारे विचिंत्य॥ तेन देहं दिव्यपिंडमुत्पन्नं विचिंत्य॥
हमित्याकाशबीजेन हृदये देहावयवान्ध्यात्वा॥ हंसोहं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

हंसः॥ इतिमंत्रेण सजीवकलां सप्राणशक्तिं देहप्रतिष्ठां ध्या
५ त्वा॥ महालक्ष्मीरूपब्रह्मणः सकाशात्प्रकृतिः प्रकृतेर्महान्॥
महतोहंकारः॥ अहंकारादाकाशः आकाशाद्वायुः वायो
रग्निः अग्नेरापः अद्भ्यः पृथिवी॥ पृथिव्या ओषधयः॥ ओ
षधीभ्योन्नं॥ अन्नाद्रेतः॥ रेतसः पुरुषः॥ इति क्रमाद्देहादि
रूपेण परमात्मस्वरूपेण च महालक्ष्मीरूपोहमिति भावयेत्॥
इति भूतशुद्धिः॥ अथ प्राणप्रतिष्ठा॥ अस्य श्रीप्राणप्रति
ष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरऋषिभ्यो नमः शिरसि॥ ऋग्यजुः
सामभ्यश्छंदोभ्यो नमः इति मुखे॥ चैतन्यरूपायै प्राणश
क्त्यै परदेवतायै नमः हृदये॥ आं बीजाय नमः गुह्ये॥ ह्रीं
शक्त्यै नमः पादयोः॥ क्रों कीलकाय नमः नाभौ॥ प्राणप्र
तिष्ठां याविनियोगाय नमः॥ करसंपुटे॥ ॐ अं कं खं गं घं २

"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(3A)

ॐ आं पृथिव्यप्तेजोवाय्वाकाशात्मने हृदयाय॰ ॐ ईं ५ शब्दस्पर्शरूप
रसगंधात्मने शिरसे स्वाहा॥ ॐ ऊं टं ५ ऊं श्रोत्रत्वक्चक्षुर्जिह्वाघ्रा
णात्मने शिखायै॰ ॐ लं ५ ऐं वाक्पाणिपादपायूपस्थात्मने कव
चाय हुं॥ ॐ ओं पं ५ ओं वचनादानगमनविसर्गानंदात्मने ने
त्रत्रयाय वौषट्॥ ॐ अं यं र ५ अः मनोबुध्यासहंकारचि
त्तविज्ञानात्मने अस्त्राय॰ इत्येभिर्मंत्रैरंगुष्ठादिहृदया
दिन्यासान्विधाय॥ ध्यायेत्॥ रक्तांभोधिस्थपोतोल्लस
दरुणसरोजाधिरूढा कराब्जैः पाशं कोदंडमिक्षूद्भवगुण
मथमप्यंकुशं पंचबाणान्॥ बिभ्राणासृक्कपालं त्रिनयन
लसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुख
करी प्राणशक्तिः परा नः॥ इति ध्यात्वा॥ ततो हृदि हस्तं दत्वा॥
ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सोहं हंसः। क्रों ह्रीं आं मम प्राण

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

इह प्राणाः मम जीव इह स्थिताः मम सर्वेंद्रियाणि इहागत्य सु
खं चिरं तिष्ठंतु स्वाहा इति त्रिर्जपेत् ॥ अथ पंचदशावारावृत्तेन
प्रणवेन स्वस्य ॥ गर्भाधानादि पंचदशसंस्कारान्भावयेत् इति
प्राणप्रतिष्ठा ॥ अथ न्यासाः ॥ आदावंत मातृकान्यासः ॥ अस्य
श्रीअंतर्मातृकान्यासस्य ब्रह्मणे ऋषये नमः शिरसि ॥ गायत्र्यै
छंदसे नमः मुखे ॥ मातृकासरस्वत्यै देवतायै नमः हृदये हल्
बीजेभ्यो नमः गुह्ये स्वरेभ्यः शक्तिभ्यो नमः पादयोः ॥ बिंदुभ्यः की
लकाय नमः नाभौ ॥ मंत्रिका पाठांगत्वेन न्यासे विनियोगाय नमः
करसंपुटे ॥ ॐ अं ५ आं हृदयाय ॥ ॐ इं ५ ईं शिरसे ॥ ॐ उं ५ ऊं
शिखायै ॥ ॐ एं ५ ऐं कवचाय ॥ ॐ ओं ५ औं नेत्रत्रयाय ॥ ॐ अं ५
अः अस्त्राय फट् ॥ इत्येवं करांगहृदयादिन्यासान्विधाय ध्या
येत् ॥ अंकोन्मुक्तशशांककोटिसदृशीमापीनतुंगस्तनीं चंद्रा
र्धांचितमस्तकां मधुमदेनालोलनेत्रत्रयां ॥ बिभ्राणामनिशं

Rajawade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project of the

(9A) वरं जपवटीं भ्रूलं कपालं करे राज्ञां यौवनगर्वितां लिपितनुं
वागीश्वरीमाश्रये इति ॥ अथ कंठे विशुद्ध्याख्यषोडशदलकं
मले चोर्ध्वपादि प्रादक्षिण्येन ॥ अं नमः आं नमः इत्यादि क्रमा
त् षोडश स्वरान् हृदये अनाहताख्यद्वादशदलकमले प्रा
गादि प्रादक्षिण्येन कं नमः इत्यादि क्रमात् कादि ठांतान् ॥ ना
भौ मणिपुराख्यदशदलकमले प्राग्वत् डादि फांतान् ॥ लिंग
स्योपरितः स्वाधिष्ठानाख्यषड्दलकमले प्राग्वत् बादि लांतान्
गुदलिंगांतरे मूलाधाराख्यचतुर्दलकमले वादि सांतान् ॥ भ्रू
मध्ये भ्रूसासंज्ञे द्विदलकमले हक्षवामे ऊर्ध्वपाः क्रमात् ॥ ओं हं २
नमः ॐ क्षं नमः इति वा न्यसेत् ॥ इत्यंतर्मातृकान्यासः ॥ अथ बहिर्मा
तृकान्यासः ॥ अथ ऋष्यादिन्यासः ॥ प्राग्वत् ॥ ध्यानं ॥ पंचाशद्वर्ण
भेदैर्विहितवदनदोःपादहृत्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलि

(5)

तरुशशिकलामिंदुकुंदेरवावदातां ॥ असस्त्रकुंभचिंतालिखितवरकरां
त्रीक्षणाब्जसंस्थामछाकल्पामतुछस्तनजघनभरांभारतींतांनमा
मि॥ इतिततः अंनमः शिरसि॥ आंनमः मुखे। प्राग्वत् इं ईं दक्षवाम
नेत्रयोः। उं ऊं कर्णयोः। ऋं ॠं नासापुटयोः। ऌं ॡं कपोलयोः। एं ऐं
उत्तराधरोष्ठयोः। ओं औं दंतपंक्त्योः। अं जिव्हायां। अः तालुमूले।
कं५ दक्षिणभुजसंध्यग्रेषु विन्यसामि। चं५ वामभुजसंध्यग्रेषु
टं५ दक्षिणपादसंध्यग्रेषु तं५ वामपादसंध्यग्रेषु। पंफं पार्श्वद्वये।
बंपृष्ठे। भंनाभौ। मंजठरे। यं हृदये। रं दक्षांसे। लं त्वगात्मने ककु
दि। वं असृगात्मवामांसे। रेफवक। रो दक्षवामकक्षयोः इंत्यंपि
शंमांसात्मने हृदयादिदक्षकक्षांतं। षंमेदरुधात्मने हृदयाद्वा
मकक्षांतं। इंमेहृदयादिहस्ताग्नामिस्यापि। संअस्थ्यात्मने हृदया
दिदक्षपादांतं। हंमज्जात्मने हृदयाद्वामपादांतं। ळं शुक्रात्म
ने हृदयादिगुह्यांतं। क्षं हृदयादिमस्तकांतं ऊर्ध्वापि॥ इतिवर्हिर्मातृकान्या
सः इति समाप्तं॥

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com